M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 332

Title: Bhuta Shakti Stotra

332

11 Incomplete

	Bhutashakti Stotra &	Title
	Other Stotras	Author
		Editor
		Year, Vols.
		Publisher
332		Remarks

देवतेनघराजलोद्धृतागेतनतेसत्येनमोक्षय।उद्धृत्यदंष्ट्रयायज्ञांस्त्रीन्पिंडान्क
तवानसि त्वंपितृण [illegible] तेतेन॰त्येनमोचय दीर्घवक्त्रेणरूपेणहि
रण्याक्षस्यसंयुगे शिरोजहारवक्त्रेण तेनसत्येनमोचय नृसिंहमूर्त्तिमास्थि
क्षोहिरण्यकशिपुःपुरा हुंकारेणहतोदैत्यस्तेनसत्येनमोक्षय; दानवाभ्यां
हृतावेदाब्रह्मण;पद्मपतः पुरापरित्रातास्त्वयादेवातेनसत्येनमोक्षय। कृ
त्वाहयशिरोरूपंहत्वातुमधुकैटभौ ब्रह्मणेस्त्वर्पितावेदास्तेनसत्येनमोक्षय;
देवदानवगंधर्वयक्षविद्यामहोरगाः अनंतंतवनपश्यंतितेनसत्येनमोक्षय;
अपांतरतमानामजातोवेदस्यवैसुतः कृताश्चतेनवेदार्थास्तेनसत्येनमोक्ष
यः देवयज्ञाग्निहोत्राणिपितृयज्ञंद्विषिच रहस्यंतवदेवस्यतेनसत्येनमोक्ष
यः ऋषिर्दीर्घतपानामजात्यंधोगुरुशापतः त्वत्प्रसादाच्चचक्षुष्मांस्तेन
सत्येनमोक्षय; ग्राहग्रस्तंगजेंद्रंचदीनंमृत्युवशंगतं भक्तंमोक्षितवांस्त्वं

हितेनसत्येनमोक्षय। अक्षयश्चाव्ययस्त्वंहिब्रह्मण्योभक्तवत्सलः। उद्धि
तानांनिहंतासितेनसत्येनमोक्षय। शंखचक्रगदापाणेशार्ङ्गगरुडमेवच
प्रसादयामिशिरसातेबंधान्मोक्षयतुमां ततोःप्रसन्नोभगवान्नादिदेवेशा
खगोत्तमं गरुडंनागहन्तारंबलिंमोक्षयबंधनात् ततोविक्षिप्यगरुडःपक्षा
वतुलविक्रमः। जगामवसुधामूलंयत्रास्तेसंयतोबलिः। आगमंतस्यविज्ञाय
नागामुक्त्वामहासुरं ययुःपुरींभोगवतींवैनतेयभयार्दिता। मुक्तंकृष्णप्र
सादेनचित्रयानमधोमुखं भ्रष्टश्रियमुवाचेदंगरुत्मान्पन्नगाशनः। गरु
डउवाच दानवेंद्रमहाबाहोविष्णुस्त्वामब्रवीत्प्रभुः। मुक्तोसिवसपातालेस
पुत्रजनबांधवः। इतस्त्वयानगंतव्यंकदाचिदपिदानव समयंयदिभिद्यास्त्वम्
र्द्धातेशततधाब्रजेत् पक्षींद्रवचनंश्रुत्वादानवेंद्रोब्रवीदिदं स्थितोस्मिसमयेतस्य
अनंतस्यमहात्मनः। जीवोपायंतुभगवान्समकिंचित्करोतुसः। इहस्योहंवा सु
सिनःपातालेचखगेश्वरः। बलेस्तद्वचनंश्रुत्वागरुत्मानिदमब्रवीत् गरुडउवाच

कथितस्तेसुरश्रेष्ठजीवोपायोमहात्मना वर्त्तयिष्यन्तियेयज्ञान्विधिहीनान
ऋत्विजः। प्रायश्चित्तमजानंतोयज्ञभागास्ततस्तव नतेषांयज्ञभागंवैप्रतिगृह्णं
तिदेवताः। अनेनाप्यायितबलेसुखमत्रनिवत्स्यसि वैशंपायनउवाच
संदेशमेवंभगवान्नवात्कश्यपात्मजः। दानवेंद्रमहाबाहोविष्णुर्खेलोकभाव
नः। इमंस्तवमनंतस्यसर्वपापप्रमोचनं यःपठेत्प्रयतोभक्त्यातस्यनश्यंति
किल्बिषं गोहत्यायाःप्रमुच्येतब्रह्मघ्नोब्रह्महत्यया अपुत्रोलभतेपुत्रंकन्या
चैवेप्सितंपतिं लब्धगर्भागर्भप्रमुच्येतगुर्विणीजनयेत्सुतं येचमोक्षैषिणोलो
केयोगिनःसांख्यकापिलाः स्तवेनानेनगच्छंति श्वेतद्वीपमकल्मषं सर्वकाम
प्रदोह्येषस्तवोनंतस्यकीर्त्तितेः यःपठेत्प्रातरुत्थायशुचिःप्रयतमानसः स
र्वान्कामानवाप्नोतिमानवोनात्रसंशयः। एषवैवामनोनामप्रादुर्भावोमहात्म
नः। वेदविद्भिर्द्विजैरेतत्पठ्यतेवैष्णवैर्यतः। यस्त्विमंवामनंदिव्यंप्रादुर्भावोम

२ ह्यात्मनः शृणु यानि यतो भक्त्या सदा पर्वसु पर्वसु पर-- यतेराजा यथा
विष्णुर्महाबलः यत्नो विपुलमाप्नोति विपुलं चाप्नुते वसु प्रियो भवति भूता
नां सर्वेषां वामनो यथा पुत्रां-- श्लभन्ते से वा गुणसमन्वितान् श्रीय
ते पठते श्रास्य देवदेवो जनार्दनः सर्वकामयुतश्चैव कृष्णद्वैपायनोब्र
वीत् इति श्रीहरिवंशे वामनप्रादुर्भावसमाप्तः ॥श्रीगणेशायन
मः श्रीसिद्धांबोवाच॥ पूर्णानंद महाभागे स्तवराजं मनोहरं कथयस्वप्र
सादेन भोगमोक्षफलप्रदं १ को देवः सर्वदेवेषु वरो-- भुवनत्रये अत्र मे
संशयं छिधि कि-- श्वसकारणं २ श्रीपूर्णानंद उ० शृणु सिद्धांब वक्ष्यामि
विश्वकारणका-- -- ज्योतिमात्रं परं धाम निष्कलं त्वचलं ध्रुवं नादरू
पमनिर्देश्यं पं मनोपः… मनोगणं अप्रमेयं परानंदं परतत्वमनामयं ४
एकमेवाद्वितीय-- चपरब्रह्म सनातनं असे… प्रकृतिः प्रोक्ता सा देवी पुरु
३

षः किल ५ परापरा आदेरस्येन शिवशक्त्यात्मकं जगत् तां देवीं शिवा प्रोक्ता यं तत्र शिवं
विदुः ६॥ तानदेयं समं कृत्वा पंथा नात्य द्वितीयकः प्राधान्यं प्रकृतिः सर्वसाक्षी पुरुषए
वच अमृतार्णवमध्यस्थ मणिद्वीपेति शोभने सुनंदनवनं तत्र रमणीयं मनोहरं ८
---द्रुमलताकीर्णं नानापक्षिरवैर्युतं कल्पवृक्षा-- वितं सम्यक् कामदेवेन रक्षितं ९
तत्र चिंतामणिगृहे रक्तसिंहासनोपरि श्रीमत्परशिवांकस्था शिवा स्वाधीनवल्लभा १०
चतुर्भुजा त्रिनयना सिंदूरारुणविग्रहा सर्वाभरणसंदीप्ता मुक्ताहारविभूषिता ११
कोटिकंदर्पलावण्या विचित्रांबरधारिणी सूर्यकोटिप्रतीकाशा चंद्रकोटिसुशीतला १२
वरपाशांकुशाभीतिधारिणी परमांबिका शक्त्योऽनंगरूपाद्याः सेवितापरिचारकैः १३
रक्ताशक्तिस्तु सा प्रोक्ता द्वन्द्वे स्वार्थं समर्पिणी सप्तकोटिसहस्राणां मंत्राणां च्छेतनादिसा १४
परब्रह्माभिधाना सा सामरसपरायणा निराकारा च साकारा प्रत्यक्षशून्यविवर्जिता १५ ना
नारूपधरा नामाख्या या सा परमा कला श्रीराजराजराजेन्द्री महाभट्टारिका खिजा १६

४ अनेककोटिब्रह्मांडनायकानांतुनायिका कर्त्रीकर्तृमयाकर्त्रीस्वयंदेवीसनातनी १७
वशीकृतंचपाशेनमाययाछादितंजगत् जितंचांकुशेनैवसाजपांतासुशक्तिरिं १८
सानिर्बध्यापरंज्योतिःसाव्ययंपरमंपदं लक्ष्यालक्ष्यस्वरूपासासुषुम्णांतरगामिनी १९
आधाराद्ब्रह्मरंध्रांतंबिसतंतुतनीयसी सुषुम्णांतर्गतानाडीग्रथितापंकजस्रच २०
चित्रांतरेवज्रनाडीसार्धाधिबुकतंतुना नवसूक्ष्मस्वरूपाचब्रह्मनाडीतदंतरे २१
तत्रकुंडलिनीमूलाधारेसर्पाकृतिःस्थिता विद्युत्कोटिसहस्राभानवसूक्ष्मातिसूक्ष्मि
णी २२ परापश्यंतिकामध्यावैखरीवाङ्मयीशिवा यातायातक्रमेणैवसाभित्त्वापद्मपंकजं २३
चक्रं २३ चंद्रमंडलसंपर्काद्रावयित्वासुधारसं तेनाभिषिच्यगात्राणिपुनःप्राप्तास्वकेतनं २४
सादिक्षांतविलासेनसर्वेमंत्राःप्रजज्ञिरे वेदगर्भासापरामेस्तुराईसर्वदावतु २५
सिद्धांवेदंपरंज्ञानंसंक्षेपात्कथितंमया एवंयश्चिंतयेच्चित्तेसमुक्तोजन्मबंधनात् २६
अथातःसंप्रवक्ष्यामिस्तवराजमनोहरं यस्यश्रवणमात्रेणसर्वपापक्षयोभवेत् २७
यासच्चिदानंदमयीतुरीयातीतापरांबाश्रुतिनापिनज्ञा एकाद्वितीयात्रिगुणास्वि ५

लेनीतापत्रयान्मामवतुप्रकाशा २८ यस्याःप्रभावं [illegible] आसनोनवक्तुंसमर्थोनचि
वोनधाता निद्रादिदेवाःसकलाश्चतस्याःकिंत्वयहंबाजडबुद्धिरत्र २९ तथापिमा
तस्तवपादपद्मभक्तिप्रभावात्प्रवदामिकिंचित् ज्ञानेनवाज्ञानतयाबिकेतत्स
मस्वमातःकरुणांविधेहि ३० रामोदरोयोशिवबीतिहोत्रोपुष्टिस्तथावैधृघणः
सुरेन्द्राःशांतिश्चचंद्रेणयुताःसमस्ताःलक्ष्मीप्रतिष्ठात्वपकालकाल ३१ इधाकला
चेतनयाप्रयुक्तातथाचनंदीखलुकांतियुक्ताःसमीरणेनैतिकनाथनामातथा
चलोयंखलुतुष्टियुक्तं ३२ ह्लीप्रयुक्ताःकिलकूर्मनाथौझिंटीशनाथस्तवमंत्र रू
रूप अभीष्टदंसंभजतांचसर्वेस्वेस्वेधिकारेस्थितिमेतिदेवि ३३ विश्वेशिदेवा
सुरमानवाद्याभजंतियेतेचरणारविंदं तेषांकरस्थेसुरभूरुहश्रीर्मुखारविं
देसुरसासुवाचा ३४ दारिद्र्यदावानलपीडितोहंमातःशिवेत्वांशरणंगतोस्मि
नोवाभवेत्त्वत्करुणामयीशोनिराश्रयःकिंशरणंव्रजामि ३५ विश्वासमेकं

५ परमंमहांतंत्वदीयनाम्नः परमेष्ठु तस्मात् मंत्रादिमंत्रादिरूपाणिधिस्त्वं
गतात्मनः किंपुनरोधर्मे ३६ सुराईसिद्धेविधिनाह्यराणिललाटपट्टेलिखि
तानियेच तवांघ्रिरेणुत्परिमार्जयाम्बुभ्रोगंचमोक्षंचददस्वमातः ३७ त्वंता
रिणीतारयमांहितारेनिमज्जमानंभवसागरेस्मिन् त्वामाश्रितायेपुरुषा
भवेन्शोचासास्मयास्तेजनवह्नवदंतिवेदाः ३८ सहस्रशीर्षासिसहस्रने
त्रासहस्रपादाबहिरंतरस्था त्वंविश्वरूपाखिलविश्वधात्रीकिंस्तोमिमात
स्तवपादपद्मं ३९ मयामाल्लोल्यान्मदात्क्रोधजाल्लोभजान्मोहपा
शाज्ञमाच्चाभिमानात् कृतायेपराधाश्चमाक्षर्यभावात्क्षमस्वक्षमस्वक्ष
मस्वक्षमाई ४० नाम्नात्वयामहिषमर्द्दिनियाहशीचपापस्यनाशानवि
धीपरमातिशक्तिः यद्यप्यहंकुमतिमान्घनपातकीचतावद्धिपापकरणेच
तथाप्यशक्तः ४१ त्वन्नाममात्रसकृदेवजपेनजंतुनिः किल्बिषोस्तिद्वार
५

णगतवक्लेशः तस्मात्त्वयात्रिपुरसुंदरिमामनाथेदीनेमलेत्रशरणंदेत्रशर
णंददस्व ४२ त्वमेवविद्यापितरौत्वमेवत्वमेवभाग्यंसुहृदत्वमेव मति
स्त्वमेवासिगतिस्त्वमेवत्वमेवसर्वंममदीननाथे ४३ नमोगुरोनिःप्र
पंचशिष्यहृन्त्पद्मभास्कर देहिमेपरमंज्ञानंकुबुद्धिंमेविनाशय ४४
विनायकनमस्तेस्तुनमस्तेवटुभैरव तिरस्करणितेनौमिममविघ्नान्
विनाशय ४५ नमःपीतांबरेश्रीन्नमस्तेवाराहिभैरवि नमोवेराईच्छृण
३ममशत्रुन्विनाशय ४६ नमस्तेरक्तचामुंडेनमस्तेधूम्रलोचने नमः
प्रत्यंगिरेकृत्येममशत्रुन्विनाशय ४७ कादिकालिनमस्तेस्तुनमस्ते
हादिसुंदरि नमःसादिपराशक्तेनिर्वाणपददायिनि ४८ कटसादिम
हानित्येनमस्त्रिपुरसुंदरि नमोनमस्तेतुरीयेश्रीमंत्रेत्रिपुरसुंदरि ४९
नमःस्तेपंचमिश्रीममहात्रिपुरसुंदरि नमःकामकलेदेविश्रीमातःपाहिपाहिच ५०

६ कामेश्वरि नमस्तुभ्यं कृपया मां विलोकय राज्यं देहि सुखं देहि निमोदे
विमेतं गते ५१ नमो देवि महामाये नमो वांछाधिकप्रदे नमस्ते करुणा
मूर्त्ते नमस्ते भक्तवत्सले ५२ अनधीते गतिं देहि काव्यवेदागमादिषु ग
द्यपद्यमयीं वाणीं देहि वाचाईवेंकुरे ५३ भक्तिं देहि त[illegible]प्रज्ञां सर्वत्त्वमे
विनाशाय देहि मे चिरजीवित्वमनालस्यमरोगतां ५४ इत्येतत्कथितं तु
भ्यं मंत्रजालविलीगर्जितं गुह्याद्गुह्यतरं साक्षात्त्वत्ता[illegible]यं परं ५५
य इदं पठते स्तोत्रं जन्ममध्ये सकृन्नरः चतुर्वर्गफलं तस्य[illegible]वेन्नैवात्र संश
यः ५६ संकटत्राणनामेदं स्तवराजं पठेत्सदा तस्य पुण्यफलं वक्तुं सिद्धांवा
हं न शक्यते ५७ बहुनाकिमिहोक्तेन देवीप्रीतिकरं शुभं स[illegible]द्विप्रदं पुं
सां नात्र कार्या विचारणात् ५८ प्रयोगे तद्विधानेन जपेद्धीत्तरं शतं
५ इति संक्षेपतः प्रोक्तं किमन्यच्छ्रोतुमिच्छसि ५९ इति श्रीरुद्रयामले कालनित्यानंदेह स्वो
त्वार्थ मूलतशक्तिस्तोत्रं संपूर्णम् लेखक पं श्यागणपतरामगोविंदरामेण लिखितं ८